[This question paper contains 03 printed pages.]

**Roll Number :**

**Unique Paper Code : 121301302**

**Title of the Paper : Sāhitya : Vāsavadattā & Kādambarī**

**साहित्य : वासवदत्ता एवं कादम्बरी**

**Name of the Course : MA Sanskrit Examination, Dec 2024**

**Type : CC**

**Semester : III**

**Duration : 3 Hours**

**Maximum Marks : 70**

इस प्रश्नपत्र के मिलते ही ऊपर दिए गए निर्धारित स्थान पर अपना अनुक्रमाङ्क लिखिए।
(Write Your Roll No. on the top immediately on receipt of this question paper.)

**टिप्पणीः** अन्यथा आवश्यक न होने पर इस प्रश्नपत्र का उत्तर **संस्कृत** या **हिन्दी** या **अंग्रेजी** में से किसी एक भाषा में दीजिए।
**Note:** Unless otherwise required in a question, answers should be written either in **Sanskrit** or in **Hindi** or in **English.**

1. **निम्नलिखित गद्यांशों की सप्रसङ्ग व्याख्या कीजिए:** **02x07=14**
**Explain with reference to the context the following:**

i. अभूदभूतपूर्वः नृसिंह इव दर्शितहिरण्यकशिपुक्षेत्रदानविस्मयः कंसारातिरिव जनितयशोदानन्दसमृद्धिरानकदुन्दुभिरिव कृतकाव्यादरः वरुण इवाशान्तरक्षणोऽगस्त्य इव दक्षिणाशाप्रसाधको हर इव महासेनानुगतो निवर्तितमारश्च रविरिव क्षणदानप्रियश्छायासन्तापहरश्च विद्याधरोऽपि सुमना धृतराष्ट्रोऽपि गुणप्रियः क्षमानुगतोऽपि सुधर्माश्रितो बृहन्नलानुभावोऽप्यन्तः सरलो महिमहिषीसम्भवोऽपि वृषोत्पादी राजा चिन्तामणिर्नाम।

**अथवा /OR**

तस्य च हिमालय इव जनितशिवः मधुरिव नानारामानन्दकरः क्षीरोदमथनोद्यतमन्दर इव मुखरितभुवनः रागरज्जुरिवोल्लासितरतिः शरन्मेघ इवावदातहृदयो विष्णुपदावलम्बी च पार्थ इव समरसाहसोचितः कंस इव कुवलयापीडभूषितः तार्क्ष्य इव विनताऽनन्दकरः विष्णुरिव क्रोडीकृतसुतनुः शान्तनव इव स्ववशस्थापितकालधर्मः सुबाहुरपि रामानन्दी समदृष्टिरपि महेश्वरः मुक्तामयोऽप्यतरलमध्यः वंशप्रदीपोऽप्यक्षतदशस्तनयोऽभूत्कन्दर्पकेतुर्नाम।

ii. को नामास्य तत्त्वनिरूपणे समर्थः। तथाहि भीमो नबकद्वेषी आश्रयाशोऽपि मातरिश्वा अतिकटुरपि महारसः सर्षपस्नेह इव करयुगलालितोऽपि शिरसा धृतोऽपि न कटुत्वं जहाति। तालफलरस इवापातमधुरः परिणामविरसस्तिक्तश्च। पादपराग इवावधूतोऽपि मूर्धानं कषाययति। विषतरुप्रसूतमिव यथा यथाऽनुभूयते तथा तथा मोहमेव द्रढयति। नीचदेशस्येव नवारिविरहोऽस्य जायते। अन्धकार इव दोषानुबन्धचतुरः विश्वकर्मावलोपनोद्यतश्च।

**अथवा /OR**

यश्च सायन्तनसमयमज्जत्पुलिन्दराजसुन्दरीनिम्ननाभिमण्डलपीतप्रतिहतरयसलिलया मदमुखरराजहंसकुल–कोलाहलमुखरितकूलपुलिनया तटनिकटस्थितमत्तमातङ्गगण्डस्थलविगलन्मदधाराबिन्दुप्रकरस्तबकितसलिलया तीरप्ररूढकेतकीकाननपतितधूलीनिकुरम्बसंजातसितसैकतसुखोपविष्टतरुणसुरमिथुननिधुवनलीलापरिमलसाक्षि–कूलोपवनया तटावटविघटिताम्भोजषण्डमण्डपावस्थितजलदेवतावगाह्यमानपयसा रेवया प्रियतमयेव प्रसारिततरङ्गहस्तयोपगूढः।

2. **निम्नलिखित गद्यांशों की सप्रसङ्ग व्याख्या कीजिए:** **02x07=14**
**Explain with reference to the context the following:**

i. आसीदशेषनरपतिशिरःसम्यर्भितशासनः पाकशासन इवापरः चक्रधर इव करकमलोपलक्ष्यमाणशङ्खचक्रलाञ्छनः कमलयोनिरिव विमानीकृतराजहंसमण्डलः रविरिव प्रतिदिवसोपजायमानोदयः दिग्गज इवानवरतप्रवृत्तदानार्द्रीकृतकरः आहर्त्ता क्रतूनाम् उदयशैलो मित्रमण्डलस्य उत्पातकेतुरहितजनस्य प्रत्यादेशो धनुष्मतां वैन्य इव चापकोटिसमुत्सारितसकलाऽरातिकुलाचलो राजा शूद्रको नाम।

**अथवा /OR**

शरदमिव विकसितपुण्डरीकलोचनां प्रावृषमिव घनकेशजालां मलयमेखलामिव चन्दनपल्लवावतंसां नक्षत्रमालामिव चित्रश्रवणाभरणभूषितां श्रियमिव हस्तस्थितकमलशोभां मूर्च्छामिव मनोहारिणीम् अरण्यभूमिमिव अक्षतरूपसम्पन्नां दिव्ययोषितमिवाकुलीनां निद्रामिव लोचनग्राहिणीम् अमूर्त्तामिव स्पर्शवर्जिताम् आलेख्यगतामिव दर्शनमात्रफलां यक्षाधिपलक्ष्मीमिवालकोद्भासिनीम् अचिरोपरूढयौवनाम् अतिशयरूपाकृतिम् अनिमिषलोचनो ददर्श।

ii. तस्यैवंविधस्य सरसः पश्चिमे तीरे राघवशरप्रहारजर्जरितबालतरुषण्डस्य च समीपे दिग्गजकरदण्डानुकारिणा जरदजगरेण सततमावेष्टितमूलतया बद्धमहालवाल इव पुराणतया पतनभयादिव वायुस्कन्धलग्नः दुर्योधन इवोपलक्षितशकुनिपक्षपातः नवजलधरव्यूह इव नभसि दर्शितोन्नतिः अखिलभुवनतलावलोकनप्रासाद इव वनदेवतानाम् अधिपतिरिव दण्डकारण्यस्य नायक इव सर्ववनस्पतीनां विन्ध्याटवीमवस्थितो महान् जीर्णः शाल्मलीवृक्षः।

**अथवा /OR**

तत्तनयश्च हारीतनामा मुनिकुमारकः राहुरिवासकृदास्वादितसोमः पद्मनिकर इव दिवसकरमरीचिपः द्रौणिरिव कृपानुगतः वरुण इव कृतोदवासः हरिरिवापनीतनरकभयः भगीरथ इव दृष्टगङ्गावतारः भ्रमर इवासकृदनुभूतपुष्करवनवासः वनचरोऽपि कृतमहालयप्रवेशः असंयतोऽपि मोक्षार्थी सामप्रयोगपरोऽपि सततावलम्बितदण्डः सुप्तोऽपि प्रबुद्धः सन्निहितनेत्रद्वयोऽपि परित्यक्तवामलोचनस्तदेव कमलसरः सिस्नासुरुपागमत्।

3. **प्रत्येक भाग में से कम से कम एक का चयन करते हुए किन्हीं तीन पर टिप्पणी लिखिए:** **03x05=15**
Write short notes on **three** in total, taking at least **one** from each part:

**भाग: 'क' (Part: A)**

चिन्तामणि की शासनव्यवस्था, विन्ध्याचलवर्णन, कुसुमपुरस्थित प्रासादवर्णन ।

**भाग:'ख'(Part: B)**

विन्ध्याटवीवर्णन, शबरसैन्यवर्णन, जाबालिवर्णन ।

4. **निम्नलिखित पद्य की संस्कृत में व्याख्या कीजिए:** **07**
Explain the following verse in **Sanskrit**:

अतिमलिने कर्त्तव्ये भवति खलानामतीव निपुणा धीः।
तिमिरे हि कौशिकानां रूपं प्रतिपद्यते चक्षुः।।

**अथवाOR**

सुभाषितं हारि विशत्यधो गलान्न दुर्जनस्यार्करिपोरिवामृतम्।
तदेव धत्ते हृदयेन सज्जनो हरिर्महारत्नमिवातिनिर्मलम्।।

5. 'वासवदत्ता का चरित्रचित्रण' **अथवा** 'कन्दर्पकेतु का चरित्रचित्रण' विषय पर निबन्ध लिखिए। **10**
Write an essay on 'Characteristics of Vāsavadattā' **or** 'Characteristics of Kandarpaketu.

6. 'शूद्रक का चरित्रचित्रण' **अथवा** 'पञ्चवटीवर्णन' विषय पर एक समीक्षात्मक लेख लिखिए। **10**
Write a critical essay on 'Characteristics of Śūdraka' **or** 'Description of Pañcavaṭī'.